इ॒ति न नेती॒ति नेहेह नेती॒ति नेह ।

(12)[P21] 5.7.5.5(11)– न । इ॒ह । लो॒कः ।

नेहेह न नेह लो॒को लो॒क इ॒ह न नेह लो॒कः ।

(13)[P21] 5.7.5.5(12)– इ॒ह । लो॒कः । अ॒स्ति॒ ।

इ॒ह लो॒को लो॒क इ॒हेह लो॒को ऽस्त्यस्ति लो॒क इ॒हेह लो॒को ऽस्ति ।

(14)[P21] 5.7.5.5(13)– लो॒कः । अ॒स्ति॒ । इति ।

लो॒को ऽस्त्यस्ति लो॒को लो॒को ऽस्तीती त्यस्ति लो॒को लो॒को ऽस्तीति ।

(15)[P21] 5.7.5.5(14)– अ॒स्ति॒ । इति । अ॒ब्र॒वी॒त् ।

अ॒स्तीती त्यस्त्य॒ स्तीत्यब्रवी दब्रवी॒ दित्य स्त्य॒ स्तीत्यब्रवीत् ।

(16)[P21] 5.7.5.5(15)– इति । अ॒ब्र॒वी॒त् । सः ।

इत्यब्रवी दब्रवी॒ दिती त्यब्रवी॒थ् स सो ऽब्रवी॒ दिती त्यब्रवी॒थ् सः ।

(17)[P21] 5.7.5.5(16)– अ॒ब्र॒वी॒त् । सः । वि॒श्वक॑र्माणम् ।

अ॒ब्र॒वी॒थ् स सो ऽब्रवी दब्रवी॒थ् स वि॒श्वक॑र्माणं ँवि॒श्वक॑र्माण॒(ग्म्॒) सो ऽब्रवी दब्रवी॒थ् स वि॒श्वक॑र्माणम् ।

(18)[P21] 5.7.5.5(17)– सः । वि॒श्वक॑र्माणम् । च॒ ।

स वि॒श्वक॑र्माणं ँवि॒श्वक॑र्माण॒(ग्म्॒) स स वि॒श्वक॑र्माणम् च च वि॒श्वक॑र्माण॒(ग्म्॒) स स वि॒श्वक॑र्माणम् च ।

(19)[P21] 5.7.5.5(18)– वि॒श्वक॑र्माणम् । च॒ । य॒ज्ञम् ।

वि॒श्वक॑र्माणम् च च वि॒श्वक॑र्माणं ँवि॒श्वक॑र्माणम् च य॒ज्ञं ँय॒ज्ञम् च॑ वि॒श्वक॑र्माणं ँवि॒श्वक॑र्माणम् च य॒ज्ञम् ।

(20)[P21] 5.7.5.5(18)– विश्वकर्माणम् ।

विश्वकर्माणमिति विश्व – कर्माणम् ।

(21)[P21] 5.7.5.5(19)– च । यज्ञम् । च ।

च यज्ञं ँयज्ञम् च च यज्ञम् च च यज्ञम् च च यज्ञम् च ।

(22)[P21] 5.7.5.5(20)– यज्ञम् । च । अब्रवीत् ।

यज्ञम् च च यज्ञं ँयज्ञम् चाब्रवी दब्रवीच् च यज्ञं ँयज्ञम् चाब्रवीत् ।

(23)[P21] 5.7.5.5(21)– च । अब्रवीत् । उप ।

चाब्रवी दब्रवीच् च चाब्रवी दुपोपा ब्रवीच् च चाब्रवी दुप ।

(24)[P21] 5.7.5.5(22)– अब्रवीत् । उप । वाम् ।

अब्रवी दुपोपा ब्रवी दब्रवी दुप वां ँवा मुपाब्रवी दब्रवी दुप वाम् ।

(25)[P21] 5.7.5.5(23)– उप । वाम् । आ । (GS–5.7–18)

उप वां ँवा मुपोप वा मा वा मुपोप वा मा ।

(26)[P21] 5.7.5.5(24)– वाम् । आ । अयानि । (GS–5.7–18)

वा मा वां ँवा मा ऽया न्यया न्या वां ँवा मा ऽयानि ।

(27)[P21] 5.7.5.5(25)– आ । अयानि । इति । (GS–5.7–18)

आ ऽया न्यया न्याऽयानीती त्यया न्याऽयानीति ।

(28)[P21] 5.7.5.5(26)– अयानि । इति । न । (GS–5.7–18)

अयानी तीत्यया न्ययानीति न नेत्यया न्ययानीति न ।

(29)[P21] 5.7.5.5(27)– इति । न । इह । (GS–5.7–18)

इति न नेतीति नेहेह नेतीति नेह ।

(30)[P21] 5.7.5.5(28)– न । इ॒ह । लो॒कः । (GS–5.7–18)

नेहे ह न नेह लो॒को लो॒क इ॒ह न नेह लो॒कः ।

(31)[P21] 5.7.5.5(29)– इ॒ह । लो॒कः । अ॒स्ति । (GS–5.7–18)

इ॒ह लो॒को लो॒क इ॒हेह लो॒को᳚ ऽस्त्यस्ति लो॒क इ॒हेह लो॒को᳚ ऽस्ति ।

(32)[P21] 5.7.5.5(30)– लो॒कः । अ॒स्ति । इति॑ ।

लो॒को᳚ ऽस्त्यस्ति लो॒को लो॒को᳚ ऽस्तीती त्य॑स्ति लो॒को लो॒को᳚ ऽस्तीति॑ ।

(33)[P21] 5.7.5.5(31)– अ॒स्ति । इति॑ । अ॒ब्रू॒ता॒म् ।

अ॒स्तीती त्य॑स् त्य॒स्ती त्य॑ब्रूता मब्रूता॒ मित्य॑स् त्य॒स्ती त्य॑ब्रूताम् ।

(34)[P21] 5.7.5.5(32)– इति॑ । अ॒ब्रू॒ता॒म् । सः ।

इत्य॑ब्रूता मब्रूता॒ मिती त्य॑ब्रूता॒(ग्म्॒) स सो᳚ ऽब्रूता॒ मिती त्य॑ब्रूता॒(ग्म्॒) सः ।

(35)[P21] 5.7.5.5(33)– अ॒ब्रू॒ता॒म् । सः । ए॒ताम् ।

अ॒ब्रू॒ता॒(ग्म्॒) स सो᳚ ऽब्रूता मब्रूता॒(ग्म्॒) स ए॒ता मे॒ता(ग्म्) सो᳚ ऽब्रूता मब्रूता॒(ग्म्॒) स ए॒ताम् ।

(36)[P21] 5.7.5.5(34)– सः । ए॒ताम् । तृ॒तीया᳚म् ।

स ए॒ता मे॒ता(ग्म्) स स ए॒ताम् तृ॒तीया᳚म् तृ॒तीया॑ मे॒ता(ग्म्) स स ए॒ताम् तृ॒तीया᳚म् ।

(37)[P21] 5.7.5.5(35)– ए॒ताम् । तृ॒तीया᳚म् । चिति᳚म् ।

ए॒ताम् तृ॒तीया᳚म् तृ॒तीया॑ मे॒ता मे॒ताम् तृ॒तीया॒म् चिति॒म् चिति॑म् तृ॒तीया॑ मे॒ता मे॒ताम् तृ॒तीया॒म् चिति᳚म् ।

(38)[P21] 5.7.5.5(36)– तृ॒तीया᳚म् । चिति᳚म् । अ॒प॒श्य॒त् ।

तृ॒तीया॒म् चिति॒म् चिति॑म् तृ॒तीया᳚म् तृ॒तीया॒म् चिति॑ मपश्य दपश्य॒च् चिति॑म् तृ॒तीया᳚म् तृ॒तीया॒म् चिति॑ मपश्यत् ।

(39)[P21] 5.7.5.5(37)- चितिम् । अपश्यत् । ताम् ।

चिति मपश्य दपश्यच् चितिम् चिति मपश्यत् ताम् ता मपश्यच् चितिम् चिति मपश्यत् ताम् ।

(40)[P21] 5.7.5.5(38)- अपश्यत् । ताम् । उप ।

अपश्यत् ताम् ता मपश्य दपश्यत् ता मुपोप ता मपश्य दपश्यत् ता मुप ।

(41)[P21] 5.7.5.5(39)- ताम् । उप । अधत्त ।

ता मुपोप ताम् ता मुपाधत्ता धत्तोप ताम् ता मुपाधत्त ।

(42)[P21] 5.7.5.5(40)- उप । अधत्त । तत् ।

उपाधत्ता धत्तो पोपा धत्त तत् तदधत्तो पोपा धत्त तत् ।

(43)[P21] 5.7.5.5(41)- अधत्त । तत् । असौ ।

अधत्त तत् तदधत्ता धत्त तदसा वसौ तदधत्ता धत्त तदसौ ।

(44)[P21] 5.7.5.5(42)- तत् । असौ । अभवत् ।

तदसा वसौ तत् तदसा वभव दभव दसौ तत् तदसा वभवत् ।

(45)[P21] 5.7.5.5(43)- असौ । अभवत् । सः ।

असा वभव दभव दसा वसा वभवथ् स सो ऽभवदसा वसा वभवथ् सः ।

(46)[P21] 5.7.5.5(44)- अभवत् । सः । आदित्यः ।

अभवथ् स सो ऽभव दभवथ् स आदित्य आदित्यः सो ऽभव दभवथ् स आदित्यः ।

(47)[P21] 5.7.5.5(45)- सः । आदित्यः । प्रजापतिम् ।

स आदित्य आदित्यः स स आदित्यः प्रजापतिम् प्रजापति मादित्यः स स आदित्यः प्रजापतिम् ।

(48)[P21] 5.7.5.5(46)- आदित्यः । प्रजापतिम् । अब्रवीत् ।

आदित्यः प्रजापतिम् प्रजापति मादित्य आदित्यः प्रजापति मब्रवी दब्रवीत् प्रजापति मादित्य आदित्यः प्रजापति मब्रवीत् ।

(49)[P21] 5.7.5.5(47)- प्रजापतिम् । अब्रवीत् । उप ।

प्रजापति मब्रवी दब्रवीत् प्रजापतिम् प्रजापति मब्रवी दुपोपा ब्रवीत् प्रजापतिम् प्रजापति मब्रवी दुप ।

(50)[P21] 5.7.5.5(47)- प्रजापतिम् ।

प्रजापतिमिति प्रजा - पतिम् ।

(51)[P21] 5.7.5.5(48)- अब्रवीत् । उप । त्वा ।

अब्रवी दुपोपा ब्रवी दब्रवी दुप त्वा त्वोपा ब्रवी दब्रवी दुप त्वा ।

(52)[P21] 5.7.5.5(49)- उप । त्वा । आ ।

उप त्वा त्वोपोप त्वा ऽऽत्वो पोप त्वा ।

(53)[P21] 5.7.5.5(50)- त्वा । आ । अयानि ।

त्वा ऽऽत्वा त्वा ऽया न्यया न्यात्वा त्वा ऽयानि ।

(1)[P22] 5.7.5.6(1)- आ । अयानि । इति ।

आ ऽयान्य या न्याऽयानीती त्यया न्याऽयानीति ।

(2)[P22] 5.7.5.6(2)- अयानि । इति । न ।

अयानीती त्यया न्ययानीति न नेत्य या न्ययानीति न ।

(3)[P22] 5.7.5.6(3)- इति । न । इह ।

इति न नेतीति नेहेह नेतीति नेह ।

(4)[P22] 5.7.5.6(4)– न । इ॒ह । लो॒कः ।

नेहेह न नेह लो॒को लो॒क इ॒ह न नेह लो॒कः ।

(5)[P22] 5.7.5.6(5)– इ॒ह । लो॒कः । अ॒स्ति॒ ।

इ॒ह लो॒को लो॒क इ॒हेह लो॒को᳚ ऽस्त्यस्ति लो॒क इ॒हेह लो॒को᳚ ऽस्ति ।

(6)[P22] 5.7.5.6(6)– लो॒कः । अ॒स्ति॒ । इति॑ ।

लो॒को᳚ ऽस्त्यस्ति लो॒को लो॒को᳚ ऽस्तीती त्य॑स्ति लो॒को लो॒को᳚ ऽस्तीति॑ ।

(7)[P22] 5.7.5.6(7)– अ॒स्ति॒ । इति॑ । अ॒ब्र॒वी॒त् ।

अ॒स्तीती त्य॑स्त्य॒ स्तीत्य॑ब्रवी दब्रवी॒ दित्य॑ स्त्य॒ स्तीत्य॑ब्रवीत् ।

(8)[P22] 5.7.5.6(8)– इति॑ । अ॒ब्र॒वी॒त् । सः ।

इत्य॑ब्रवी दब्र॒वीदिती त्य॑ब्रवी॒थ् स सो᳚ ऽब्र॒वीदिती त्य॑ब्रवी॒थ् सः ।

(9)[P22] 5.7.5.6(9)– अ॒ब्र॒वी॒त् । सः । वि॒श्वक॑र्माणम् ।

अ॒ब्र॒वी॒थ् स सो᳚ ऽब्रवी दब्रवी॒थ् स वि॒श्वक॑र्माणं ँवि॒श्वक॑र्मा॒ण(ग्म्) सो᳚ ऽब्रवी दब्रवी॒थ्
स वि॒श्वक॑र्माणम् ।

(10)[P22] 5.7.5.6(10)– सः । वि॒श्वक॑र्माणम् । च॒ ।

स वि॒श्वक॑र्माणं ँवि॒श्वक॑र्मा॒ण(ग्म्) स स वि॒श्वक॑र्माणम् च च वि॒श्वक॑र्मा॒ण(ग्म्) स स
वि॒श्वक॑र्माणम् च ।

(11)[P22] 5.7.5.6(11)– वि॒श्वक॑र्माणम् । च॒ । य॒ज्ञम् ।

वि॒श्वक॑र्माणम् च च वि॒श्वक॑र्माणं ँवि॒श्वक॑र्माणम् च य॒ज्ञं ँय॒ज्ञम् च॑ वि॒श्वक॑र्माणं
ँवि॒श्वक॑र्माणम् च य॒ज्ञम् ।

(12)[P22] 5.7.5.6(11)– वि॒श्वक॑र्माणम् ।

वि॒श्वक॑र्मा॒णमिति॑ वि॒श्व – क॒र्मा॒ण॒म् ।

(13)[P22] 5.7.5.6(12)- च । यज्ञम् । च ।

च यज्ञं यँज्ञम् च च यज्ञम् च च यज्ञम् च च यज्ञम् च ।

(14)[P22] 5.7.5.6(13)- यज्ञम् । च । अब्रवीत् ।

यज्ञम् च च यज्ञं यँज्ञम् चाब्रवी दब्रवीच् च यज्ञं यँज्ञम् चाब्रवीत् ।

(15)[P22] 5.7.5.6(14)- च । अब्रवीत् । उप ।

चाब्रवी दब्रवीच् च चाब्रवी दुपोपाब्रवीच् च चाब्रवी दुप ।

(16)[P22] 5.7.5.6(15)- अब्रवीत् । उप । वाम् ।

अब्रवी दुपोपा ब्रवी दब्रवी दुप वां वँा मुपाब्रवी दब्रवी दुप वाम् ।

(17)[P22] 5.7.5.6(16)- उप । वाम् । आ ।

उप वां वँा मुपोप वा मा वा मुपोप वा मा ।

(18)[P22] 5.7.5.6(17)- वाम् । आ । अयानि ।

वा मा वां वँा मा ऽया न्यया न्या वां वँा मा ऽयानि ।

(19)[P22] 5.7.5.6(18)- आ । अयानि । इति ।

आ ऽयान्य यान्या ऽयानी तीत्यया न्याऽयानीति ।

(20)[P22] 5.7.5.6(19)- अयानि । इति । न ।

अयानी तीत्यया न्ययानीति न नेत्यया न्ययानीति न ।

(21)[P22] 5.7.5.6(20)- इति । न । इह ।

इति न नेतीति नेहेह नेतीति नेह ।

(22)[P22] 5.7.5.6(21)- न । इह । लोकः ।

नेहेह न नेह लोको लोक इह न नेह लोकः ।

(23)[P22] 5.7.5.6(22)– इह । लोकः । अस्ति ।

इह लोको लोक इहेह लोको ऽस्त्यस्ति लोक इहेह लोको ऽस्ति ।

(24)[P22] 5.7.5.6(23)– लोकः । अस्ति । इति ।

लोको ऽस्त्यस्ति लोको लोको ऽस्तीती त्यस्ति लोको लोको ऽस्तीति ।

(25)[P22] 5.7.5.6(24)– अस्ति । इति । अब्रूताम् ।

अस्तीती त्यस्त्यस्ती त्यब्रूता मब्रूता मित्य स्त्यस्ती त्यब्रूताम् ।

(26)[P22] 5.7.5.6(25)– इति । अब्रूताम् । सः ।

इत्यब्रूता मब्रूता मिती त्यब्रूता(ग्म्) स सो ऽब्रूता मिती त्यब्रूता(ग्म्) सः ।

(27)[P22] 5.7.5.6(26)– अब्रूताम् । सः । परमेष्ठिनम् ।

अब्रूता(ग्म्) स सो ऽब्रूता मब्रूता(ग्म्) स परमेष्ठिनम् परमेष्ठिन(ग्म्) सो ऽब्रूता मब्रूता(ग्म्) स परमेष्ठिनम् ।

(28)[P22] 5.7.5.6(27)– सः । परमेष्ठिनम् । अब्रवीत् ।

स परमेष्ठिनम् परमेष्ठिन(ग्म्) स स परमेष्ठिन मब्रवी दब्रवीत् परमेष्ठिन(ग्म्) स स परमेष्ठिन मब्रवीत् ।

(29)[P22] 5.7.5.6(28)– परमेष्ठिनम् । अब्रवीत् । उप ।

परमेष्ठिन मब्रवी दब्रवीत् परमेष्ठिनम् परमेष्ठिन मब्रवी दुपोपा ब्रवीत् परमेष्ठिनम् परमेष्ठिन मब्रवी दुप ।

(30)[P22] 5.7.5.6(29)– अब्रवीत् । उप । त्वा ।

अब्रवी दुपोपा ब्रवी दब्रवी दुप त्वा त्वोपा ब्रवी दब्रवी दुप त्वा ।

(31)[P22] 5.7.5.6(30)– उप । त्वा । आ ।

उप त्वा त्वोपोप त्वा ऽऽत्वो पोप त्वा ।

(32)[P22] 5.7.5.6(31)- त्वा । आ । अयानि ।

त्वा ऽऽत्वा त्वा ऽया न्यया न्या त्वा त्वा ऽयानि ।

(33)[P22] 5.7.5.6(32)- आ । अयानि । इति ।

आ ऽया न्यया न्याऽयानी तीत्य या न्याऽयानीति ।

(34)[P22] 5.7.5.6(33)- अयानि । इति । केन ।

अयानी तीत्यया न्ययानीति केन केने त्यया न्ययानीति केन ।

(35)[P22] 5.7.5.6(34)- इति । केन । मा ।

इति केन केने तीति केन मा मा केने तीति केन मा ।

(36)[P22] 5.7.5.6(35)- केन । मा । उपैष्यसि ।

केन मा मा केन केन मोपैष्य स्युपैष्यसि मा केन केन मोपैष्यसि ।

(37)[P22] 5.7.5.6(36)- मा । उपैष्यसि । इति ।

मोपैष्य स्युपैष्यसि मा मोपैष्यसीती त्युपैष्यसि मा मोपैष्यसीति ।

(38)[P22] 5.7.5.6(37)- उपैष्यसि । इति । लोकंपृणया ।

उपैष्यसीती त्युपैष्य स्युपैष्यसीति लोकंपृणया लोकंपृण येत्युपैष्य स्युपैष्यसीति लोकंपृणया ।

(39)[P22] 5.7.5.6(37)- उपैष्यसि ।

उपैष्यसीत्युप - ऐष्यसि ।

(40)[P22] 5.7.5.6(38)- इति । लोकंपृणया । इति ।

इति लोकंपृणया लोकंपृणयेतीति लोकंपृणयेतीति लोकंपृणयेतीति लोकंपृणयेति ।

(41)[P22] 5.7.5.6(39)- लोकंपृणया । इति । अब्रवीत् ।

लोकंपृणयेतीति लोकंपृणया लोकंपृणये त्यब्रवी दब्रवी दिति लोकंपृणया लोकंपृणये त्यब्रवीत् ।

(42)[P22] 5.7.5.6(39)– लोकंपृणया ।

लोकंपृणयेति लोकं – पृणया ।

(43)[P22] 5.7.5.6(40)– इति । अब्रवीत् । तम् ।

इत्यब्रवी दब्रवी दिती त्यब्रवीत् तम् त मब्रवी दिती त्यब्रवीत् तम् ।

(44)[P22] 5.7.5.6(41)– अब्रवीत् । तम् । लोकंपृणया ।

अब्रवीत् तम् त मब्रवी दब्रवीत् तम् ँलोकंपृणया लोकंपृणया त मब्र वीदब्रवीत् तम् ँलोकंपृणया ।

(45)[P22] 5.7.5.6(42)– तम् । लोकंपृणया । उपैत् ।

तम् ँलोकंपृणया लोकंपृणया तम् तम् ँलोकंपृणयो पैदुपै ल्लोकंपृणया तम् तम् ँलोकंपृणयोपैत् ।

(46)[P22] 5.7.5.6(43)– लोकंपृणया । उपैत् । तस्मात् ।

लोकंपृणयो पैदुपै ल्लोकंपृणया लोकंपृणयोपैत् तस्मात् तस्मा दुपै ल्लोकंपृणया लोकंपृणयोपैत् तस्मात् ।

(47)[P22] 5.7.5.6(43)– लोकंपृणया ।

लोकंपृणयेति लोकं – पृणया ।

(48)[P22] 5.7.5.6(44)– उपैत् । तस्मात् । अयातयाम्नी ।

उपैत् तस्मात् तस्मा दुपै दुपैत् तस्मा दयातया म्न्ययातयाम्नी तस्मा दुपै दुपैत् तस्मा दयातयाम्नी ।

(49)[P22] 5.7.5.6(44)– उपैत् ।

उपैदित्युप – ऐत् ।

(50)[P22] 5.7.5.6(45)- तस्मात् । अयातयाम्नी । लोकंपृणा ।

तस्मा दयातया म्न्ययातयाम्नी तस्मात् तस्मा दयातयाम्नी लोकंपृणा लोकंपृणा ऽयातयाम्नी तस्मात् तस्मा दयातयाम्नी लोकंपृणा ।

(51)[P22] 5.7.5.6(46)- अयातयाम्नी । लोकंपृणा । अयातयामा । (GS-5.7-19)

अयातयाम्नी लोकंपृणा लोकंपृणा ऽयातया म्न्ययातयाम्नी लोकंपृणा ऽयातयामा ऽयातयामा लोकंपृणा ऽयातयाम्न्य यातयाम्नी लोकंपृणा ऽयातयामा ।

(52)[P22] 5.7.5.6(46)- अयातयाम्नी । (GS-5.7-19)

अयातयाम्नीत्ययात - याम्नी ।

(53)[P22] 5.7.5.6(47)- लोकंपृणा । अयातयामा । हि । (GS-5.7-19)

लोकंपृणा ऽयातयामा ऽयातयामा लोकंपृणा लोकंपृणा ऽयातयामा हि ह्ययातयामा लोकंपृणा लोकंपृणा ऽयातयामा हि ।

(54)[P22] 5.7.5.6(47)- लोकंपृणा । (GS-5.7-19)

लोकंपृणेति लोकं - पृणा ।

(55)[P22] 5.7.5.6(48)- अयातयामा । हि । असौ । (GS-5.7-19)

अयातयामा हि ह्ययातयामा ऽयातयामा ह्यसा वसौ ह्ययातयामा ऽयातयामा ह्यसौ ।

(56)[P22] 5.7.5.6(48)- अयातयामा । (GS-5.7-19)

अयातयामेत्ययात - यामा ।

(57)[P22] 5.7.5.6(49)- हि । असौ । आदित्यः । (GS-5.7-19)

ह्यसा वसौ हि ह्यसा वादित्य आदित्यो ऽसौ हि ह्यसा वादित्यः ।

(58)[P22] 5.7.5.6(50)- असौ । आदित्यः । तान् । (GS-5.7-19)

असा वादित्य आदित्यो ऽसा वसा वादित्य स्ता(गग्) स्तानादित्यो ऽसा वसा वादित्य स्तान् ।

(1)[P23] 5.7.5.7(1)- आदित्यः । तान् । ऋषयः । (GS-5.7-19)

आदित्य स्ता(ग्ग्) स्ता नादित्य आदित्य स्ता नृषय ऋषय स्ता नादित्य आदित्य स्ता नृषयः ।

(2)[P23] 5.7.5.7(2)- तान् । ऋषयः । अब्रुवन्न् । (GS-5.7-19)

तानृषय ऋषय स्ता(ग्ग्) स्ता नृषयो ऽब्रुवन् नब्रुवन् नृषय स्ता(ग्ग्) स्ता नृषयो ऽब्रुवन्न् ।

(3)[P23] 5.7.5.7(3)- ऋषयः । अब्रुवन्न् । उप ।

ऋषयो ऽब्रुवन् नब्रुवन् नृषय ऋषयो ऽब्रुवन् नुपोपाब्रुवन् नृषय ऋषयो ऽब्रुवन् नुप ।

(4)[P23] 5.7.5.7(4)- अब्रुवन्न् । उप । वः । (GS-5.7-20)

अब्रुवन् नुपोपाब्रुवन् नब्रुवन् नुप वो व उपाब्रुवन् नब्रुवन् नुप वः ।

(5)[P23] 5.7.5.7(5)- उप । वः । आ । (GS-5.7-20)

उप वो व उपोप व आ व उपोप व आ ।

(6)[P23] 5.7.5.7(6)- वः । आ । अयाम । (GS-5.7-20)

व आ वो व आ ऽयामा यामा वो व आ ऽयाम ।

(7)[P23] 5.7.5.7(7)- आ । अयाम । इति । (GS-5.7-20)

आ ऽयामा यामा ऽयामे तीत्ययामा ऽयामेति ।

(8)[P23] 5.7.5.7(8)- अयाम । इति । केन । (GS-5.7-20)

अयामे तीत्य यामा यामेति केन केने त्ययामा यामेति केन ।

(9)[P23] 5.7.5.7(9)- इति । केन । नः । (GS-5.7-20)

इति केन केने तीति केन नो नः केने तीति केन नः ।

(10)[P23] 5.7.5.7(10)- केन । नः । उपैष्यथ । (GS-5.7-20)

केन नो नः केन केन न उपैष्य थोपैष्यथ नः केन केन न उपैष्यथ ।

(11)[P23] 5.7.5.7(11)- नः । उपैष्यथ । इति । (GS-5.7-20)

न उपैष्य थोपैष्यथ नो न उपैष्यथे तीत्युपैष्यथ नो न उपैष्यथेति ।

(12)[P23] 5.7.5.7(12)- उपैष्यथ । इति । भूम्ना । (GS-5.7-20)

उपैष्यथे तीत्युपैष्य थोपैष्यथेति भूम्ना भूम्ने त्युपैष्य थोपैष्यथेति भूम्ना ।

(13)[P23] 5.7.5.7(12)- उपैष्यथ । (GS-5.7-20)

उपैष्यथेत्युप - ऐष्यथ ।

(14)[P23] 5.7.5.7(13)- इति । भूम्ना । इति । (GS-5.7-20)

इति भूम्ना भूम्नेतीति भूम्नेतीति भूम्नेतीति भूम्नेति ।

(15)[P23] 5.7.5.7(14)- भूम्ना । इति । अब्रुवन्न् । (GS-5.7-20)

भूम्नेतीति भूम्ना भूम्ने त्यब्रुवन् नब्रुवन् निति भूम्ना भूम्ने त्यब्रुवन्न् ।

(16)[P23] 5.7.5.7(15)- इति । अब्रुवन्न् । तान् । (GS-5.7-20)

इत्यब्रुवन् नब्रुवन् निती त्यब्रुवन् ता(गग्) स्ता नब्रुवन् नितीत्य ब्रुवन् तान् ।

(17)[P23] 5.7.5.7(16)- अब्रुवन्न् । तान् । द्वाभ्याम् । (GS-5.7-20)

अब्रुवन् ता(गग्) स्तानब्रुवन् नब्रुवन् तान् द्वाभ्याम् द्वाभ्याम् तानब्रुवन् नब्रुवन् तान् द्वाभ्याम् ।

(18)[P23] 5.7.5.7(17)- तान् । द्वाभ्याम् । चितीभ्याम् ।

तान् द्वाभ्याम् द्वाभ्याम् ता(गग्) स्तान् द्वाभ्याम् चितीभ्याम् चितीभ्याम् द्वाभ्याम् ता(गग्) स्तान् द्वाभ्याम् चितीभ्याम् ।

(19)[P23] 5.7.5.7(18)- द्वाभ्याम् । चितीभ्याम् । उपायन्न् ।

द्वाभ्याम् चितीभ्याम् चितीभ्याम् द्वाभ्याम् द्वाभ्याम् चितीभ्या मुपायन् नुपाय ञ्चितीभ्याम् द्वाभ्याम् द्वाभ्याम् चितीभ्या मुपायन्न् ।

(20)[P23] 5.7.5.7(19)– चितीभ्याम् । उपायन्न् । सः । (GS–5.7–21)

चितीभ्या मुपायन् नुपाय ञ्चितीभ्याम् चितीभ्या मुपायन् थ्स स उपाय ञ्चितीभ्याम् चितीभ्या मुपायन् थ्सः ।

(21)[P23] 5.7.5.7(19)– चितीभ्याम् । (GS–5.7–21)

चितीभ्यामिति चिति – भ्याम् ।

(22)[P23] 5.7.5.7(20)– उपायन्न् । सः । पञ्चचितीकः । (GS–5.7–21)

उपायन् थ्स स उपायन् नुपायन् थ्स पञ्चचितीकः पञ्चचितीकः स उपायन् नुपायन् थ्स पञ्चचितीकः ।

(23)[P23] 5.7.5.7(20)– उपायन्न् । (GS–5.7–21)

उपायन्नित्युप – आयन्न् ।

(24)[P23] 5.7.5.7(21)– सः । पञ्चचितीकः । सम् ।

स पञ्चचितीकः पञ्चचितीकः स स पञ्चचितीकः स(ग्म्) सम् पञ्चचितीकः स स पञ्चचितीकः सम् ।

(25)[P23] 5.7.5.7(22)– पञ्चचितीकः । सम् । अपद्यत ।

पञ्चचितीकः स(ग्म्) सम् पञ्चचितीकः पञ्चचितीकः स मपद्यता पद्यत सम् पञ्चचितीकः पञ्चचितीकः स मपद्यत ।

(26)[P23] 5.7.5.7(22)– पञ्चचितीकः ।

पञ्चचितीक इति पञ्च – चितीकः ।

(27)[P23] 5.7.5.7(23)– सम् । अपद्यत । यः ।

स मपद्यता पद्यत स(ग्म्) स मपद्यत यो यो ऽपद्यत स(ग्म्) स मपद्यत यः ।

(28)[P23] 5.7.5.7(24)- अपद्यत । यः । एवम् ।

अपद्यत यो यो ऽपद्यता पद्यत य एव मेवं ँयो ऽपद्यता पद्यत य एवम् ।

(29)[P23] 5.7.5.7(25)- यः । एवम् । विद्वान् ।

य एव मेवं ँयो य एवं ँविद्वान्. विद्वा नेवं ँयो य एवं ँविद्वान् ।

(30)[P23] 5.7.5.7(26)- एवम् । विद्वान् । अग्निम् ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वा नग्नि मग्निं ँविद्वा नेव मेवं ँविद्वा नग्निम् ।

(31)[P23] 5.7.5.7(27)- विद्वान् । अग्निम् । चिनुते ।

विद्वा नग्नि मग्निं ँविद्वान्. विद्वा नग्निम् चिनुते चिनुते ऽग्निं ँविद्वान्. विद्वा नग्निम् चिनुते ।

(32)[P23] 5.7.5.7(28)- अग्निम् । चिनुते । भूयान् ।

अग्निम् चिनुते चिनुते ऽग्नि मग्निम् चिनुते भूयान् भूया(गग्) श्चिनुते ऽग्नि मग्निम् चिनुते भूयान् ।

(33)[P23] 5.7.5.7(29)- चिनुते । भूयान् । एव । (GS-5.7-22)

चिनुते भूयान् भूया(गग्) श्चिनुते चिनुते भूया नेवैव भूया(गग्) श्चिनुते चिनुते भूया नेव ।

(34)[P23] 5.7.5.7(30)- भूयान् । एव । भवति । (GS-5.7-22)

भूया नेवैव भूयान् भूया नेव भवति भव त्येव भूयान् भूया नेव भवति ।

(35)[P23] 5.7.5.7(31)- एव । भवति । अभि ।

एव भवति भव त्येवैव भव त्यभ्यभि भव त्येवैव भव त्यभि ।

(36)[P23] 5.7.5.7(32)- भवति । अभि । इमान् ।

भव त्यभ्यभि भवति भव त्यभीमा निमा नभि भवति भव त्यभीमान् ।

(37)[P23] 5.7.5.7(33)- अभि । इमान् । लोकान् ।

अभीमा निमा नभ्य भीमान् ँलोकान् ँलोका निमा नभ्य भीमान् ँलोकान् ।

(38)[P23] 5.7.5.7(34)– इ॒मान् । लो॒कान् । ज॒य॒ति॒ ।

इ॒मान् ँल्लो॒कान् ँल्लो॒का नि॒मा नि॒मान् ँल्लो॒कान् ज॑यति जयति लो॒का नि॒मा नि॒मान् ँल्लो॒कान् ज॑यति ।

(39)[P23] 5.7.5.7(35)– लो॒कान् । ज॒य॒ति॒ । वि॒दुः ।

लो॒कान् ज॑यति जयति लो॒कान् ँल्लो॒कान् ज॑यति वि॒दुर् वि॒दुर् ज॑यति लो॒कान् ँल्लो॒कान् ज॑यति वि॒दुः ।

(40)[P23] 5.7.5.7(36)– ज॒य॒ति॒ । वि॒दुः । ए॒न॒म् ।

ज॒य॒ति॒ वि॒दुर् वि॒दुर् ज॑यति जयति वि॒दु रे॑न मेनं ँवि॒दुर् ज॑यति जयति वि॒दु रे॑नम् ।

(41)[P23] 5.7.5.7(37)– वि॒दुः । ए॒न॒म् । दे॒वाः ।

वि॒दु रे॑न मेनं ँवि॒दुर् वि॒दु रे॑नम् दे॒वा दे॒वा ए॑नं ँवि॒दुर् वि॒दु रे॑नम् दे॒वाः ।

(42)[P23] 5.7.5.7(38)– ए॒न॒म् । दे॒वाः । अथो᳚ ।

ए॒न॒म् दे॒वा दे॒वा ए॑न मेनम् दे॒वा अथो॒ अथो॑ दे॒वा ए॑न मेनम् दे॒वा अथो᳚ ।

(43)[P23] 5.7.5.7(39)– दे॒वाः । अथो᳚ । ए॒तासा᳚म् ।

दे॒वा अथो॒ अथो॑ दे॒वा दे॒वा अथो॑ ए॒तासा॑ मे॒तासा॒ मथो॑ दे॒वा दे॒वा अथो॑ ए॒तासा᳚म् ।

(44)[P23] 5.7.5.7(40)– अथो᳚ । ए॒तासा᳚म् । ए॒व ।

अथो॑ ए॒तासा॑ मे॒तासा॒ मथो॒ अथो॑ ए॒तासा॑ मे॒वैवै तासा॒ मथो॒ अथो॑ ए॒तासा॑ मे॒व ।

(45)[P23] 5.7.5.7(40)– अथो᳚ ।

अथो॒ इत्यथो᳚ ।

(46)[P23] 5.7.5.7(41)– ए॒तासा᳚म् । ए॒व । दे॒वता॑नाम् ।

ए॒तासा॑ मे॒वैवै तासा॑ मे॒तासा॑ मे॒व दे॒वता॑नाम् दे॒वता॑ना मे॒वै तासा॑ मे॒तासा॑ मे॒व दे॒वता॑नाम् ।

(47)[P23] 5.7.5.7(42)- एव । देवतानाम् । सायुज्यम् ।

एव देवतानाम् देवताना मेवैव देवताना(ग्म्) सायुज्य(ग्म्) सायुज्यम् देवताना मेवैव देवताना(ग्म्) सायुज्यम् ।

(48)[P23] 5.7.5.7(43)- देवतानाम् । सायुज्यम् । गच्छति ॥

देवताना(ग्म्) सायुज्य(ग्म्) सायुज्यम् देवतानाम् देवताना(ग्म्) सायुज्यम् गच्छति गच्छति सायुज्यम् देवतानाम् देवताना(ग्म्) सायुज्यम् गच्छति ।

(49)[P23] 5.7.5.7(44)- सायुज्यम् । गच्छति ॥

सायुज्यम् गच्छति गच्छति सायुज्य(ग्म्) सायुज्यम् गच्छति ।

(50)[P23] 5.7.5.7(45)- गच्छति ॥

गच्छतीति गच्छति ।

=========

## 5.7.6 अनुवाकम् 6 – घनम्

(1)[P24] 5.7.6.1(1)– व॒यः॑ । वै । अ॒ग्निः ।

व॒यो वै वै व॒यो व॒यो वा अ॒ग्नि र॒ग्निर् वै व॒यो व॒यो वा अ॒ग्निः ।

(2)[P24] 5.7.6.1(2)– वै । अ॒ग्निः । यत् ।

वा अ॒ग्नि र॒ग्निर् वै वा अ॒ग्निर् यद् यद॒ग्निर् वै वा अ॒ग्निर् यत् ।

(3)[P24] 5.7.6.1(3)– अ॒ग्निः । यत् । अ॒ग्नि॒चित् ।

अ॒ग्निर् यद् यद॒ग्नि र॒ग्निर् यद॑ग्नि॒चि द॑ग्नि॒चिद् यद॒ग्नि र॒ग्निर् यद॑ग्नि॒चित् ।

(4)[P24] 5.7.6.1(4)– यत् । अ॒ग्नि॒चित् । प॒क्षिणः॑ ।

यद॑ग्नि॒चि द॑ग्नि॒चिद् यद् यद॑ग्नि॒चित् प॒क्षिणः॑ प॒क्षिणो᳚ ऽग्नि॒चिद् यद् यद॑ग्नि॒चित् प॒क्षिणः॑ ।

(5)[P24] 5.7.6.1(5)– अ॒ग्नि॒चित् । प॒क्षिणः॑ । अ॒श्ञी॒यात् ।

अ॒ग्नि॒चित् प॒क्षिणः॑ प॒क्षिणो᳚ ऽग्नि॒चि द॑ग्नि॒चित् प॒क्षिणो᳚ ऽश्ञी॒या द॑श्ञी॒यात् प॒क्षिणो᳚ ऽग्नि॒चि द॑ग्नि॒चित् प॒क्षिणो᳚ ऽश्ञी॒यात् ।

(6)[P24] 5.7.6.1(5)– अ॒ग्नि॒चित् ।

अ॒ग्नि॒चिदित्य॑ग्नि – चित् ।

(7)[P24] 5.7.6.1(6)– प॒क्षिणः॑ । अ॒श्ञी॒यात् । तम् ।

प॒क्षिणो᳚ ऽश्ञी॒या द॑श्ञी॒यात् प॒क्षिणः॑ प॒क्षिणो᳚ ऽश्ञी॒यात् तम् त म॑श्ञी॒यात् प॒क्षिणः॑ प॒क्षिणो᳚ ऽश्ञी॒यात् तम् ।

(8)[P24] 5.7.6.1(7)– अ॒श्ञी॒यात् । तम् । ए॒व ।

अ॒श्ञी॒यात् तम् त म॑श्ञी॒या द॑श्ञी॒यात् त मे॒वैव त म॑श्ञी॒या द॑श्ञी॒यात् त मे॒व ।

(9)[P24] 5.7.6.1(8)– तम् । ए॒व । अ॒ग्निम् ।

त मे॒वैव तम् त मे॒वाग्नि म॒ग्नि मे॒व तम् त मे॒वाग्निम् ।

(10)[P24] 5.7.6.1(9)– एव । अग्निम् । अद्यात् ।

एवाग्नि मग्नि मेवै वाग्नि मद्या दद्या दग्नि मेवै वाग्नि मद्यात् ।

(11)[P24] 5.7.6.1(10)– अग्निम् । अद्यात् । आर्तिम् ।

अग्नि मद्या दद्या दग्नि मग्नि मद्या दार्ति मार्ति मद्या दग्नि मग्नि मद्या दार्तिम् ।

(12)[P24] 5.7.6.1(11)– अद्यात् । आर्तिम् । आ ।

अद्या दार्ति मार्ति मद्या दद्या दार्ति मा ऽऽर्ति मद्या दद्या दार्ति मा ।

(13)[P24] 5.7.6.1(12)– आर्तिम् । आ । ऋच्छेत् ।

आर्ति मा ऽऽर्ति मार्ति माच्र्छे दृच्छेदा ऽऽर्ति मार्ति माच्र्छेत् ।

(14)[P24] 5.7.6.1(13)– आ । ऋच्छेत् । सँवथ्सरम् ।

आच्र्छे दृच्छे दाच्र्छेथ् सँवथ्सर(ग्म्) सँवथ्सर मृच्छे दाच्र्छेथ् सँवथ्सरम् ।

(15)[P24] 5.7.6.1(14)– ऋच्छेत् । सँवथ्सरम् । व्रतम् ।

ऋच्छेथ् सँवथ्सर(ग्म्) सँवथ्सर मृच्छे दृच्छेथ् सँवथ्सरं ँव्रतं ँव्रत(ग्म्) सँवथ्सर मृच्छे दृच्छेथ् सँवथ्सरं ँव्रतम् ।

(16)[P24] 5.7.6.1(15)– सँवथ्सरम् । व्रतम् । चरेत् ।

सँवथ्सरं ँव्रतं ँव्रत(ग्म्) सँवथ्सर(ग्म्) सँवथ्सरं ँव्रतम् चरेच् चरेद् व्रत(ग्म्) सँवथ्सर(ग्म्) सँवथ्सरं ँव्रतम् चरेत् ।

(17)[P24] 5.7.6.1(15)– सँवथ्सरम् ।

सँवथ्सरमिति सं – वथ्सरम् ।

(18)[P24] 5.7.6.1(16)– व्रतम् । चरेत् । सँवथ्सरम् ।

व्रतम् चरेच् चरेद् व्रतं ँव्रतम् चरेथ् सँवथ्सर(ग्म्) सँवथ्सरम् चरेद् व्रतं ँव्रतम् चरेथ् सँवथ्सरम् ।

(19)[P24] 5.7.6.1(17)– च॒रेत् । स॒ँव॒थ्स॒रम् । हि ।

च॒रेथ् स॒ँव॒थ्स॒र(ग्म्) स॑ँवथ्स॒रम् च॑रेच् चरेथ् सँवथ्स॒र(ग्म्) हि हि स॑ँवथ्स॒रम् च॑रेच् चरेथ् सँवथ्स॒र(ग्म्) हि ।

(20)[P24] 5.7.6.1(18)– स॒ँव॒थ्स॒रम् । हि । व्र॒तम् ।

स॒ँव॒थ्स॒र(ग्म्) हि हि स॑ँवथ्स॒र(ग्म्) स॑ँवथ्स॒र(ग्म्) हि व्र॒तं ँव्र॒त(ग्म्) हि स॑ँवथ्स॒र(ग्म्) स॑ँवथ्स॒र(ग्म्) हि व्र॒तम् ।

(21)[P24] 5.7.6.1(18)– स॒ँव॒थ्स॒रम् ।

स॒ँव॒थ्स॒रमिति॑ सं – व॒थ्स॒रम् ।

(22)[P24] 5.7.6.1(19)– हि । व्र॒तम् । न ।

हि व्र॒तं ँव्र॒त(ग्म्) हि हि व्र॒तम् न न व्र॒त(ग्म्) हि हि व्र॒तम् न ।

(23)[P24] 5.7.6.1(20)– व्र॒तम् । न । अति॑ ।

व्र॒तम् न न व्र॒तं ँव्र॒तम् नात्यति॒ न व्र॒तं ँव्र॒तम् नाति॑ ।

(24)[P24] 5.7.6.1(21)– न । अति॑ । प॒शुः ।

नात्यति॒ न नाति॑ प॒शुः प॒शु रति॒ न नाति॑ प॒शुः ।

(25)[P24] 5.7.6.1(22)– अति॑ । प॒शुः । वै ।

अति॑ प॒शुः प॒शु रत्यति॑ प॒शुर् वै वै प॒शु रत्यति॑ प॒शुर् वै ।

(26)[P24] 5.7.6.1(23)– प॒शुः । वै । ए॒षः ।

प॒शुर् वै वै प॒शुः प॒शुर् वा ए॒ष ए॒ष वै प॒शुः प॒शुर् वा ए॒षः ।

(27)[P24] 5.7.6.1(24)– वै । ए॒षः । यत् ।

वा ए॒ष ए॒ष वै वा ए॒ष यद् यदे॒ष वै वा ए॒ष यत् ।

(28)[P24] 5.7.6.1(25)- एषः । यत् । अग्निः ।

एष यद् यदेष एष यदग्नि रग्निर् यदेष एष यदग्निः ।

(29)[P24] 5.7.6.1(26)- यत् । अग्निः । हिनस्ति ।

यदग्नि रग्निर् यद् यदग्निर्. हिनस्ति हिनस्त्यग्निर् यद् यदग्निर्. हिनस्ति ।

(30)[P24] 5.7.6.1(27)- अग्निः । हिनस्ति । खलु ।

अग्निर्. हिनस्ति हिनस्त्यग्नि रग्निर्. हिनस्ति खलु खलु हिनस्त्यग्नि रग्निर्. हिनस्ति खलु ।

(31)[P24] 5.7.6.1(28)- हिनस्ति । खलु । वै ।

हिनस्ति खलु खलु हिनस्ति हिनस्ति खलु वै वै खलु हिनस्ति हिनस्ति खलु वै ।

(32)[P24] 5.7.6.1(29)- खलु । वै । तम् ।

खलु वै वै खलु खलु वै तम् तं ँवै खलु खलु वै तम् ।

(33)[P24] 5.7.6.1(30)- वै । तम् । पशुः ।

वै तम् तं ँवै वै तम् पशुः पशु स्तं ँवै वै तम् पशुः ।

(34)[P24] 5.7.6.1(31)- तम् । पशुः । यः ।

तम् पशुः पशु स्तम् तम् पशुर् यो यः पशु स्तम् तम् पशुर् यः ।

(35)[P24] 5.7.6.1(32)- पशुः । यः । एनम् ।

पशुर् यो यः पशुः पशुर् य एन मेनं ँयः पशुः पशुर् य एनम् ।

(36)[P24] 5.7.6.1(33)- यः । एनम् । पुरस्तात् ।

य एन मेनं ँयो य एनम् पुरस्तात् पुरस्ता देनं ँयो य एनम् पुरस्तात् ।

(37)[P24] 5.7.6.1(34)- एनम् । पुरस्तात् । प्रत्यञ्चम् ।

एनम् पुरस्तात् पुरस्ता देन मेनम् पुरस्तात् प्रत्यञ्चम् प्रत्यञ्चम् पुरस्ता देन मेनम् पुरस्तात् प्रत्यञ्चम् ।

(38)[P24] 5.7.6.1(35)– पुरस्तात् । प्रत्यञ्चम् । उपचरति ।

पुरस्तात् प्रत्यञ्चम् प्रत्यञ्चम् पुरस्तात् पुरस्तात् प्रत्यञ्च मुपचर त्युपचरति प्रत्यञ्चम् पुरस्तात् पुरस्तात् प्रत्यञ्च मुपचरति ।

(39)[P24] 5.7.6.1(36)– प्रत्यञ्चम् । उपचरति । तस्मात् ।

प्रत्यञ्च मुपचर त्युपचरति प्रत्यञ्चम् प्रत्यञ्च मुपचरति तस्मात् तस्मा दुपचरति प्रत्यञ्चम् प्रत्यञ्च मुपचरति तस्मात् ।

(40)[P24] 5.7.6.1(37)– उपचरति । तस्मात् । पश्चात् ।

उपचरति तस्मात् तस्मा दुपचर त्युपचरति तस्मात् पश्चात् पश्चात् तस्मा दुपचर त्युपचरति तस्मात् पश्चात् ।

(41)[P24] 5.7.6.1(37)– उपचरति ।

उपचरतीत्युप – चरति ।

(42)[P24] 5.7.6.1(38)– तस्मात् । पश्चात् । प्राङ् ।

तस्मात् पश्चात् पश्चात् तस्मात् तस्मात् पश्चात् प्राङ् प्राङ् पश्चात् तस्मात् तस्मात् पश्चात् प्राङ् ।

(43)[P24] 5.7.6.1(39)– पश्चात् । प्राङ् । उपचर्यः ।

पश्चात् प्राङ् प्राङ् पश्चात् पश्चात् प्राङ् ङुपचर्य उपचर्यः प्राङ् पश्चात् पश्चात् प्राङ् ङुपचर्यः ।

(44)[P24] 5.7.6.1(40)– प्राङ् । उपचर्यः । आत्मनः ।

प्राङ् ङुपचर्य उपचर्यः प्राङ् प्राङ् ङुपचर्य आत्मन आत्मन उपचर्यः प्राङ् प्राङ् ङुपचर्य आत्मनः ।

(45)[P24] 5.7.6.1(41)– उपचर्यः । आत्मनः । अहि(ग्म्)सायै ।

उपचर्य आत्मन आत्मन उपचर्य उपचर्य आत्मनो ऽहि(ग्म्)साया अहि(ग्म्)साया आत्मन उपचर्य उपचर्य आत्मनो ऽहि(ग्म्)सायै ।

(46)[P24] 5.7.6.1(41)- उपचर्यः ।

उपचर्य इत्युप - चर्यः ।

(47)[P24] 5.7.6.1(42)- आत्मनः । अहि(ग्म्)सायै । तेजः ।

आत्मनो ऽहि(ग्म्)साया अहि(ग्म्)साया आत्मन आत्मनो ऽहि(ग्म्)सायै तेज स्तेजो ऽहि(ग्म्)साया आत्मन आत्मनो ऽहि(ग्म्)सायै तेजः ।

(48)[P24] 5.7.6.1(43)- अहि(ग्म्)सायै । तेजः । असि ।

अहि(ग्म्)सायै तेज स्तेजो ऽहि(ग्म्)साया अहि(ग्म्)सायै तेजो ऽस्यसि तेजो ऽहि(ग्म्)साया अहि(ग्म्)सायै तेजो ऽसि ।

(49)[P24] 5.7.6.1(44)- तेजः । असि । तेजः ।

तेजो ऽस्यसि तेज स्तेजो ऽसि तेज स्तेजो ऽसि तेज स्तेजो ऽसि तेजः ।

(50)[P24] 5.7.6.1(45)- असि । तेजः । मे ।

असि तेज स्तेजो ऽस्यसि तेजो मे मे तेजो ऽस्यसि तेजो मे ।

(51)[P24] 5.7.6.1(46)- तेजः । मे । यच्छ ।

तेजो मे मे तेज स्तेजो मे यच्छ यच्छ मे तेज स्तेजो मे यच्छ ।

(52)[P24] 5.7.6.1(47)- मे । यच्छ । पृथिवीम् ।

मे यच्छ यच्छ मे मे यच्छ पृथिवीम् पृथिवीं ँयच्छ मे मे यच्छ पृथिवीम् ।

(53)[P24] 5.7.6.1(48)- यच्छ । पृथिवीम् । यच्छ ।

यच्छ पृथिवीम् पृथिवीं ँयच्छ यच्छ पृथिवीं ँयच्छ यच्छ पृथिवीं ँयच्छ यच्छ पृथिवीं ँयच्छ ।

(54)[P24] 5.7.6.1(49)- पृथिवीम् । यच्छ । पृथिव्यै ।

पृथिवीं ँयच्छ यच्छ पृथिवीम् पृथिवीं ँयच्छ पृथिव्यै पृथिव्यै यच्छ पृथिवीम् पृथिवीं ँयच्छ पृथिव्यै ।

(55)[P24] 5.7.6.1(50)– यच्छ । पृथिव्यै । मा ।

यच्छ पृथिव्यै पृथिव्यै यच्छ यच्छ पृथिव्यै मा मा पृथिव्यै यच्छ यच्छ पृथिव्यै मा ।

(1)[P25] 5.7.6.2(1)– पृथिव्यै । मा । पाहि ।

पृथिव्यै मा मा पृथिव्यै पृथिव्यै मा पाहि पाहि मा पृथिव्यै पृथिव्यै मा पाहि ।

(2)[P25] 5.7.6.2(2)– मा । पाहि । ज्योतिः ।

मा पाहि पाहि मा मा पाहि ज्योतिर् ज्योतिः पाहि मा मा पाहि ज्योतिः ।

(3)[P25] 5.7.6.2(3)– पाहि । ज्योतिः । असि ।

पाहि ज्योतिर् ज्योतिः पाहि पाहि ज्योति रस्यसि ज्योतिः पाहि पाहि ज्योति रसि ।

(4)[P25] 5.7.6.2(4)– ज्योतिः । असि । ज्योतिः ।

ज्योति रस्यसि ज्योतिर् ज्योति रसि ज्योतिर् ज्योति रसि ज्योतिर् ज्योति रसि ज्योतिः ।

(5)[P25] 5.7.6.2(5)– असि । ज्योतिः । मे ।

असि ज्योतिर् ज्योति रस्यसि ज्योतिर् मे मे ज्योति रस्यसि ज्योतिर् मे ।

(6)[P25] 5.7.6.2(6)– ज्योतिः । मे । यच्छ ।

ज्योतिर् मे मे ज्योतिर् ज्योतिर् मे यच्छ यच्छ मे ज्योतिर् ज्योतिर् मे यच्छ ।

(7)[P25] 5.7.6.2(7)– मे । यच्छ । अन्तरिक्षम् ।

मे यच्छ यच्छ मे मे यच्छा न्तरिक्ष मन्तरिक्षं ँयच्छ मे मे यच्छा न्तरिक्षम् ।

(8)[P25] 5.7.6.2(8)– यच्छ । अन्तरिक्षम् । यच्छ ।

यच्छा न्तरिक्ष मन्तरिक्षं ँयच्छ यच्छा न्तरिक्षं ँयच्छ यच्छा न्तरिक्षं ँयच्छ यच्छा न्तरिक्षं ँयच्छ ।

(9)[P25] 5.7.6.2(9)- अन्तरिक्षम् । यच्छ । अन्तरिक्षात् ।

अन्तरिक्षं ँयच्छ यच्छा न्तरिक्ष मन्तरिक्षं ँयच्छा न्तरिक्षा दन्तरिक्षाद् यच्छा न्तरिक्ष मन्तरिक्षं ँयच्छा न्तरिक्षात् ।

(10)[P25] 5.7.6.2(10)- यच्छ । अन्तरिक्षात् । मा ।

यच्छा न्तरिक्षा दन्तरिक्षाद् यच्छ यच्छा न्तरिक्षान् मा मा ऽन्तरिक्षाद् यच्छ यच्छा न्तरिक्षान् मा ।

(11)[P25] 5.7.6.2(11)- अन्तरिक्षात् । मा । पाहि ।

अन्तरिक्षान् मा मा ऽन्तरिक्षा दन्तरिक्षान् मा पाहि पाहि मा ऽन्तरिक्षा दन्तरिक्षान् मा पाहि ।

(12)[P25] 5.7.6.2(12)- मा । पाहि । सुवः ।

मा पाहि पाहि मा मा पाहि सुवः सुवः पाहि मा मा पाहि सुवः ।

(13)[P25] 5.7.6.2(13)- पाहि । सुवः । असि ।

पाहि सुवः सुवः पाहि पाहि सुव रस्यसि सुवः पाहि पाहि सुव रसि ।

(14)[P25] 5.7.6.2(14)- सुवः । असि । सुवः ।

सुव रस्यसि सुवः सुव रसि सुवः सुव रसि सुवः सुव रसि सुवः ।

(15)[P25] 5.7.6.2(15)- असि । सुवः । मे ।

असि सुवः सुव रस्यसि सुवर् मे मे सुव रस्यसि सुवर् मे ।

(16)[P25] 5.7.6.2(16)- सुवः । मे । यच्छ ।

सुवर् मे मे सुवः सुवर् मे यच्छ यच्छ मे सुवः सुवर् मे यच्छ ।

(17)[P25] 5.7.6.2(17)- मे । यच्छ । दिवम् ।

मे यच्छ यच्छ मे मे यच्छ दिवम् दिवं ँयच्छ मे मे यच्छ दिवम् ।

(18)[P25] 5.7.6.2(18)- यच्छ । दिवम् । यच्छ ।

यच्छ दिवम् दिवं ँयच्छ यच्छ दिवं ँयच्छ यच्छ दिवं ँयच्छ यच्छ दिवं ँयच्छ ।

(19)[P25] 5.7.6.2(19)- दिवम् । यच्छ । दिवः ।

दिवं ँयच्छ यच्छ दिवम् दिवं ँयच्छ दिवो दिवो यच्छ दिवम् दिवं ँयच्छ दिवः ।

(20)[P25] 5.7.6.2(20)- यच्छ । दिवः । मा ।

यच्छ दिवो दिवो यच्छ यच्छ दिवो मा मा दिवो यच्छ यच्छ दिवो मा ।

(21)[P25] 5.7.6.2(21)- दिवः । मा । पाहि ।

दिवो मा मा दिवो दिवो मा पाहि पाहि मा दिवो दिवो मा पाहि ।

(22)[P25] 5.7.6.2(22)- मा । पाहि । इति ।

मा पाहि पाहि मा मा पाहीतीति पाहि मा मा पाहीति ।

(23)[P25] 5.7.6.2(23)- पाहि । इति । आह ।

पाहीतीति पाहि पाहीत्या हाहेति पाहि पाहीत्याह ।

(24)[P25] 5.7.6.2(24)- इति । आह । एताभिः ।

इत्याहाहे तीत्याहै ताभिरे ताभि राहे तीत्या हैताभिः ।

(25)[P25] 5.7.6.2(25)- आह । एताभिः । वै ।

आहै ताभि रेताभि राहा हैताभिर् वै वा एताभि राहा हैताभिर् वै ।

(26)[P25] 5.7.6.2(26)- एताभिः । वै । इमे ।

एताभिर् वै वा एताभि रेताभिर् वा इम इमे वा एताभि रेताभिर् वा इमे ।

(27)[P25] 5.7.6.2(27)- वै । इमे । लोकाः ।

वा इम इमे वै वा इमे लोका लोका इमे वै वा इमे लोकाः ।

(28)[P25] 5.7.6.2(28)– इमे । लोकाः । विधृताः ।

इमे लोका लोका इम इमे लोका विधृता विधृता लोका इम इमे लोका विधृताः ।

(29)[P25] 5.7.6.2(29)– लोकाः । विधृताः । यत् ।

लोका विधृता विधृता लोका लोका विधृता यद् यद् विधृता लोका लोका विधृता यत् ।

(30)[P25] 5.7.6.2(30)– विधृताः । यत् । एताः ।

विधृता यद् यद् विधृता विधृता यदेता एता यद् विधृता विधृता यदेताः ।

(31)[P25] 5.7.6.2(30)– विधृताः ।

विधृता इति वि – धृताः ।

(32)[P25] 5.7.6.2(31)– यत् । एताः । उपदधाति ।

यदेता एता यद् यदेता उपदधा त्युपदधा त्येता यद् यदेता उपदधाति ।

(33)[P25] 5.7.6.2(32)– एताः । उपदधाति । एषाम् ।

एता उपदधा त्युपदधा त्येता एता उपदधा त्येषा मेषा मुपदधा त्येता एता उपदधा त्येषाम् ।

(34)[P25] 5.7.6.2(33)– उपदधाति । एषाम् । लोकानाम् ।

उपदधा त्येषा मेषा मुपदधा त्युपदधा त्येषाम् ँल्लोकानाम् ँल्लोकाना मेषा मुपदधा त्युपदधा त्येषाम् ँल्लोकानाम् ।

(35)[P25] 5.7.6.2(33)– उपदधाति ।

उपदधातीत्युप – दधाति ।

(36)[P25] 5.7.6.2(34)– एषाम् । लोकानाम् । विधृत्यै ।

एषाम् ँल्लोकानाम् ँल्लोकाना मेषा मेषाम् ँल्लोकानां ँविधृत्यै विधृत्यै लोकाना मेषा मेषाम् ँल्लोकानां ँविधृत्यै ।

(37)[P25] 5.7.6.2(35)- लोकानाम् । विधृत्यै । स्वयमातृण्णाः ।

लोकानां ँविधृत्यै विधृत्यै लोकानाम् ँलोकानां ँविधृत्यै स्वयमातृण्णाः स्वयमातृण्णा विधृत्यै लोकानाम् ँलोकानां ँविधृत्यै स्वयमातृण्णाः ।

(38)[P25] 5.7.6.2(36)- विधृत्यै । स्वयमातृण्णाः । उपधाय ।

विधृत्यै स्वयमातृण्णाः स्वयमातृण्णा विधृत्यै विधृत्यै स्वयमातृण्णा उपधा योपधाय स्वयमातृण्णा विधृत्यै विधृत्यै स्वयमातृण्णा उपधाय ।

(39)[P25] 5.7.6.2(36)- विधृत्यै ।

विधृत्या इति वि - धृत्यै ।

(40)[P25] 5.7.6.2(37)- स्वयमातृण्णाः । उपधाय । हिरण्येष्टकाः ।

स्वयमातृण्णा उपधा योपधाय स्वयमातृण्णाः स्वयमातृण्णा उपधाय हिरण्येष्टका हिरण्येष्टका उपधाय स्वयमातृण्णाः स्वयमातृण्णा उपधाय हिरण्येष्टकाः ।

(41)[P25] 5.7.6.2(37)- स्वयमातृण्णाः ।

स्वयमातृण्णा इति स्वयं - आतृण्णाः ।

(42)[P25] 5.7.6.2(38)- उपधाय । हिरण्येष्टकाः । उप ।

उपधाय हिरण्येष्टका हिरण्येष्टका उपधा योपधाय हिरण्येष्टका उपोप हिरण्येष्टका उपधा योपधाय हिरण्येष्टका उप ।

(43)[P25] 5.7.6.2(38)- उपधाय ।

उपधायेत्युप - धाय ।

(44)[P25] 5.7.6.2(39)- हिरण्येष्टकाः । उप । दधाति ।

हिरण्येष्टका उपोप हिरण्येष्टका हिरण्येष्टका उप दधाति दधा त्युप हिरण्येष्टका हिरण्येष्टका उप दधाति ।

(45)[P25] 5.7.6.2(39)- हिरण्येष्टकाः ।

हिरण्येष्टका इति हिरण्य - इष्टकाः ।

(46)[P25] 5.7.6.2(40)- उप । दधाति । इमे ।

उप दधाति दधा त्युपोप दधातीम इमे दधा त्युपोप दधातीमे ।

(47)[P25] 5.7.6.2(41)- दधाति । इमे । वै ।

दधा तीम इमे दधाति दधा तीमे वै वा इमे दधाति दधा तीमे वै ।

(48)[P25] 5.7.6.2(42)- इमे । वै । लोकाः ।

इमे वै वा इम इमे वै लोका लोका वा इम इमे वै लोकाः ।

(49)[P25] 5.7.6.2(43)- वै । लोकाः । स्वयमातृण्णाः ।

वै लोका लोका वै वै लोकाः स्वयमातृण्णाः स्वयमातृण्णा लोका वै वै लोकाः स्वयमातृण्णाः ।

(50)[P25] 5.7.6.2(44)- लोकाः । स्वयमातृण्णाः । ज्योतिः ।

लोकाः स्वयमातृण्णाः स्वयमातृण्णा लोका लोकाः स्वयमातृण्णा ज्योतिर् ज्योतिः स्वयमातृण्णा लोका लोकाः स्वयमातृण्णा ज्योतिः ।

(51)[P25] 5.7.6.2(45)- स्वयमातृण्णाः । ज्योतिः । हिरण्यम् ।

स्वयमातृण्णा ज्योतिर् ज्योतिः स्वयमातृण्णाः स्वयमातृण्णा ज्योतिर्. हिरण्य(गम्) हिरण्यम् ज्योतिः स्वयमातृण्णाः स्वयमातृण्णा ज्योतिर्. हिरण्यम् ।

(52)[P25] 5.7.6.2(45)- स्वयमातृण्णाः ।

स्वयमातृण्णा इति स्वयं - आतृण्णाः ।

(53)[P25] 5.7.6.2(46)- ज्योतिः । हिरण्यम् । यत् ।

ज्योतिर्. हिरण्य(ग्म्) हिरण्यम् ज्योतिर् ज्योतिर्. हिरण्यं ँयद् यद्धिरण्यम् ज्योतिर् ज्योतिर्. हिरण्यं ँयत् ।

(54)[P25] 5.7.6.2(47)- हिरण्यम् । यत् । स्वयमातृण्णाः ।

हिरण्यं ँयद् यद्धिरण्य(ग्म्) हिरण्यं ँयथ् स्वयमातृण्णाः स्वयमातृण्णा यद्धिरण्य(ग्म्) हिरण्यं ँयथ् स्वयमातृण्णाः ।

(55)[P25] 5.7.6.2(48)- यत् । स्वयमातृण्णाः । उपधाय ।

यथ् स्वयमातृण्णाः स्वयमातृण्णा यद् यथ् स्वयमातृण्णा उपधा योपधाय स्वयमातृण्णा यद् यथ् स्वयमातृण्णा उपधाय ।

(56)[P25] 5.7.6.2(49)- स्वयमातृण्णाः । उपधाय । हिरण्येष्टकाः ।

स्वयमातृण्णा उपधा योपधाय स्वयमातृण्णाः स्वयमातृण्णा उपधाय हिरण्येष्टका हिरण्येष्टका उपधाय स्वयमातृण्णाः स्वयमातृण्णा उपधाय हिरण्येष्टकाः ।

(57)[P25] 5.7.6.2(49)- स्वयमातृण्णाः ।

स्वयमातृण्णा इति स्वयं - आतृण्णाः ।

(58)[P25] 5.7.6.2(50)- उपधाय । हिरण्येष्टकाः । उपदधाति ।

उपधाय हिरण्येष्टका हिरण्येष्टका उपधा योपधाय हिरण्येष्टका उपदधा त्युपदधाति हिरण्येष्टका उपधा योपधाय हिरण्येष्टका उपदधाति ।

(59)[P25] 5.7.6.2(50)- उपधाय ।

उपधायेत्युप - धाय ।

(1)[P26] 5.7.6.3(1)- हिरण्येष्टकाः । उपदधाति । इमान् ।

हिरण्येष्टका उपदधा त्युपदधाति हिरण्येष्टका हिरण्येष्टका उपदधा तीमा निमा नुपदधाति हिरण्येष्टका हिरण्येष्टका उपदधा तीमान् ।

(2)[P26] 5.7.6.3(1)- हिरण्येष्टकाः ।

हिरण्येष्टका इति हिरण्य - इष्टकाः ।

(3)[P26] 5.7.6.3(2)- उपदधाति । इमान् । एव ।

उपदधा तीमा निमा नुपदधा त्युपदधा तीमा नेवैवेमा नुपदधा त्युपदधा तीमा नेव ।

(4)[P26] 5.7.6.3(2)- उपदधाति ।

उपदधातीत्युप - दधाति ।

(5)[P26] 5.7.6.3(3)- इमान् । एव । एताभिः ।

इमा नेवैवे मा निमा नेवै ताभि रेताभि रेवे मा निमा नेवै ताभिः ।

(6)[P26] 5.7.6.3(4)- एव । एताभिः । लोकान् ।

एवैताभि रेताभि रेवैवै ताभिर् लोकान् ँल्लोका नेताभि रेवैवै ताभिर् लोकान् ।

(7)[P26] 5.7.6.3(5)- एताभिः । लोकान् । ज्योतिष्मतः ।

एताभिर् लोकान् ँल्लोका नेताभि रेताभिर् लोकान् ज्योतिष्मतो ज्योतिष्मतो लोका नेताभि रेताभिर् लोकान् ज्योतिष्मतः ।

(8)[P26] 5.7.6.3(6)- लोकान् । ज्योतिष्मतः । कुरुते ।

लोकान् ज्योतिष्मतो ज्योतिष्मतो लोकान् ँल्लोकान् ज्योतिष्मतः कुरुते कुरुते ज्योतिष्मतो लोकान् ँल्लोकान् ज्योतिष्मतः कुरुते ।

(9)[P26] 5.7.6.3(7)– ज्योतिष्मतः । कुरुते । अथो ।

ज्योतिष्मतः कुरुते कुरुते ज्योतिष्मतो ज्योतिष्मतः कुरुते ऽथो अथो कुरुते ज्योतिष्मतो ज्योतिष्मतः कुरुते ऽथो ।

(10)[P26] 5.7.6.3(8)– कुरुते । अथो । एताभिः ।

कुरुते ऽथो अथो कुरुते कुरुते ऽथो एताभि रेताभि रथो कुरुते कुरुते ऽथो एताभिः ।

(11)[P26] 5.7.6.3(9)– अथो । एताभिः । एव ।

अथो एताभि रेताभि रथो अथो एताभि रेवैवै ताभि रथो अथो एताभि रेव ।

(12)[P26] 5.7.6.3(9)– अथो ।

अथो इत्यथो ।

(13)[P26] 5.7.6.3(10)– एताभिः । एव । अस्मै ।

एताभि रेवैवै ताभि रेताभिरे वास्मा अस्मा एवै ताभि रेताभि रेवास्मै ।

(14)[P26] 5.7.6.3(11)– एव । अस्मै । इमे ।

एवास्मा अस्मा एवै वास्मा इम इमे ऽस्मा एवै वास्मा इमे ।

(15)[P26] 5.7.6.3(12)– अस्मै । इमे । लोकाः ।

अस्मा इम इमे ऽस्मा अस्मा इमे लोका लोका इमे ऽस्मा अस्मा इमे लोकाः ।

(16)[P26] 5.7.6.3(13)– इमे । लोकाः । प्र ।

इमे लोका लोका इम इमे लोकाः प्र प्र लोका इम इमे लोकाः प्र ।

(17)[P26] 5.7.6.3(14)– लोकाः । प्र । भान्ति ।

लोकाः प्र प्र लोका लोकाः प्र भान्ति भान्ति प्र लोका लोकाः प्र भान्ति ।

(18)[P26] 5.7.6.3(15)– प्र । भान्ति । याः ।

प्र भान्ति भान्ति प्र प्र भान्ति या या भान्ति प्र प्र भान्ति याः ।

(19)[P26] 5.7.6.3(16)- भान्ति । याः । ते ।

भान्ति या या भान्ति भान्ति या स्ते ते या भान्ति भान्ति या स्ते ।

(20)[P26] 5.7.6.3(17)- याः । ते । अग्ने । (GS-5.7-24)

या स्ते ते या या स्ते अग्ने अग्ने ते या या स्ते अग्ने ।

(21)[P26] 5.7.6.3(18)- ते । अग्ने । सूर्ये । (GD-34,GS-5.7-24)

ते अग्ने अग्ने ते ते अग्ने सूर्ये सूर्ये अग्ने ते ते अग्ने सूर्ये ।

(22)[P26] 5.7.6.3(19)- अग्ने । सूर्ये । रुचः । (GD-34,GS-5.7-24)

अग्ने सूर्ये सूर्ये अग्ने अग्ने सूर्ये रुचो रुचः सूर्ये अग्ने अग्ने सूर्ये रुचः ।

(23)[P26] 5.7.6.3(20)- सूर्ये । रुचः । उद्यतः । (GD-34,GS-5.7-24)

सूर्ये रुचो रुचः सूर्ये सूर्ये रुच उद्यत उद्यतो रुचः सूर्ये सूर्ये रुच उद्यतः ।

(24)[P26] 5.7.6.3(21)- रुचः । उद्यतः । दिवम् ।

रुच उद्यत उद्यतो रुचो रुच उद्यतो दिवम् दिव मुद्यतो रुचो रुच उद्यतो दिवम् ।

(25)[P26] 5.7.6.3(22)- उद्यतः । दिवम् । आतन्वन्ति ।

उद्यतो दिवम् दिव मुद्यत उद्यतो दिव मातन्वन् त्यातन्वन्ति दिव मुद्यत उद्यतो दिव मातन्वन्ति ।

(26)[P26] 5.7.6.3(22)- उद्यतः ।

उद्यत इत्युत् - यतः ।

(27)[P26] 5.7.6.3(23)- दिवम् । आतन्वन्ति । रश्मिभिः ॥

दिव मातन्वन् त्यातन्वन्ति दिवम् दिव मातन्वन्ति रश्मिभी रश्मिभि रातन्वन्ति दिवम् दिव मातन्वन्ति रश्मिभिः ।

(28)[P26] 5.7.6.3(24)- आतन्वन्ति । रश्मिभिः ॥

आतन्वन्ति रश्मिभी रश्मिभि रातन्वन् त्यातन्वन्ति रश्मिभिः ।

(29)[P26] 5.7.6.3(24)- आतन्वन्ति ।

आतन्वन्तीत्या - तन्वन्ति ।

(30)[P26] 5.7.6.3(25)- रश्मिभिः ॥

रश्मिभिरिति रश्मि - भिः ।

(31)[P26] 5.7.6.3(26)- ताभिः । सर्वाभिः । रुचे ।

ताभिः सर्वाभिः सर्वाभि स्ताभि स्ताभिः सर्वाभी रुचे रुचे सर्वाभि स्ताभि स्ताभिः सर्वाभी रुचे ।

(32)[P26] 5.7.6.3(27)- सर्वाभिः । रुचे । जनाय ।

सर्वाभी रुचे रुचे सर्वाभिः सर्वाभी रुचे जनाय जनाय रुचे सर्वाभिः सर्वाभी रुचे जनाय ।

(33)[P26] 5.7.6.3(28)- रुचे । जनाय । नः ।

रुचे जनाय जनाय रुचे रुचे जनाय नो नो जनाय रुचे रुचे जनाय नः ।

(34)[P26] 5.7.6.3(29)- जनाय । नः । कृधि ॥

जनाय नो नो जनाय जनाय न स्कृधि कृधि नो जनाय जनाय न स्कृधि ।

(35)[P26] 5.7.6.3(30)- नः । कृधि ॥

न स्कृधि कृधि नो न स्कृधि ।

(36)[P26] 5.7.6.3(31)- कृधि ॥

कृधीति कृधि ।

(37)[P26] 5.7.6.3(32)- याः । वः । देवाः ।

या वो वो या या वो देवा देवा वो या या वो देवाः ।

(38)[P26] 5.7.6.3(33)- वः । देवाः । सूर्ये ।

वो देवा देवा वो वो देवाः सूर्ये सूर्ये देवा वो वो देवाः सूर्ये ।

(39)[P26] 5.7.6.3(34)– देवाः । सूर्ये । रुचः ।

देवाः सूर्ये सूर्ये देवा देवाः सूर्ये रुचो रुचः सूर्ये देवा देवाः सूर्ये रुचः ।

(40)[P26] 5.7.6.3(35)– सूर्ये । रुचः । गोषु ।

सूर्ये रुचो रुचः सूर्ये सूर्ये रुचो गोषु गोषु रुचः सूर्ये सूर्ये रुचो गोषु ।

(41)[P26] 5.7.6.3(36)– रुचः । गोषु । अश्वेषु ।

रुचो गोषु गोषु रुचो रुचो गो ष्वश्वे ष्वश्वेषु गोषु रुचो रुचो गो ष्वश्वेषु ।

(42)[P26] 5.7.6.3(37)– गोषु । अश्वेषु । याः ।

गो ष्वश्वे ष्वश्वेषु गोषु गो ष्वश्वेषु या या अश्वेषु गोषु गो ष्वश्वेषु याः ।

(43)[P26] 5.7.6.3(38)– अश्वेषु । याः । रुचः ॥

अश्वेषु या या अश्वे ष्वश्वेषु या रुचो रुचो या अश्वे ष्वश्वेषु या रुचः ।

(44)[P26] 5.7.6.3(39)– याः । रुचः ॥

या रुचो रुचो या या रुचः ।

(45)[P26] 5.7.6.3(40)– रुचः ॥

रुच इति रुचः ।

(46)[P26] 5.7.6.3(41)– इन्द्राग्नी । ताभिः । सर्वाभिः ।

इन्द्राग्नी ताभि स्ताभि रिन्द्राग्नी इन्द्राग्नी ताभिः सर्वाभिः सर्वाभि स्ताभि रिन्द्राग्नी इन्द्राग्नी ताभिः सर्वाभिः ।

(47)[P26] 5.7.6.3(41)– इन्द्राग्नी ।

इन्द्राग्नी इतीन्द्र – अग्नी ।

(48)[P26] 5.7.6.3(42)– ताभिः । सर्वाभिः । रुचम् ।

ताभिः सर्वाभिः सर्वाभि स्ताभि स्ताभिः सर्वाभी रुच(ग्म्) रुच(ग्म्) सर्वाभि स्ताभि स्ताभिः सर्वाभी रुचम् ।

(49)[P26] 5.7.6.3(43)– सर्वाभिः । रुचम् । नः ।

सर्वाभी रुच(ग्म्) रुच(ग्म्) सर्वाभिः सर्वाभी रुचम् नो नो रुच(ग्म्) सर्वाभिः सर्वाभी रुचम् नः ।

(50)[P26] 5.7.6.3(44)– रुचम् । नः । धत्त ।

रुचम् नो नो रुच(ग्म्) रुचम् नो धत्त धत्त नो रुच(ग्म्) रुचम् नो धत्त ।

(51)[P26] 5.7.6.3(45)– नः । धत्त । बृहस्पते ॥

नो धत्त धत्त नो नो धत्त बृहस्पते बृहस्पते धत्त नो नो धत्त बृहस्पते ।

(52)[P26] 5.7.6.3(46)– धत्त । बृहस्पते ॥

धत्त बृहस्पते बृहस्पते धत्त धत्त बृहस्पते ।

(53)[P26] 5.7.6.3(47)– बृहस्पते ॥

बृहस्पत इति बृहस्पते ।

(54)[P26] 5.7.6.3(48)– रुचम् । नः । धेहि ।

रुचम् नो नो रुच(ग्म्) रुचम् नो धेहि धेहि नो रुच(ग्म्) रुचम् नो धेहि ।

(55)[P26] 5.7.6.3(49)– नः । धेहि । ब्राह्मणेषु ।

नो धेहि धेहि नो नो धेहि ब्राह्मणेषु ब्राह्मणेषु धेहि नो नो धेहि ब्राह्मणेषु ।

(56)[P26] 5.7.6.3(50)– धेहि । ब्राह्मणेषु । रुचम् ।

धेहि ब्राह्मणेषु ब्राह्मणेषु धेहि धेहि ब्राह्मणेषु रुच(ग्म्) रुचम् ब्राह्मणेषु धेहि धेहि ब्राह्मणेषु रुचम् ।

(1)[P27] 5.7.6.4(1)- ब्राह्मणेषु । रुचम् । राजसु ।

ब्राह्मणेषु रुच(ग्म्) रुचम् ब्राह्मणेषु ब्राह्मणेषु रुच(ग्म्) राजसु राजसु रुचम् ब्राह्मणेषु ब्राह्मणेषु रुच(ग्म्) राजसु ।

(2)[P27] 5.7.6.4(2)- रुचम् । राजसु । नः ।

रुच(ग्म्) राजसु राजसु रुच(ग्म्) रुच(ग्म्) राजसु नो नो राजसु रुच(ग्म्) रुच(ग्म्) राजसु नः ।

(3)[P27] 5.7.6.4(3)- राजसु । नः । कृधि ॥

राजसु नो नो राजसु राजसु न स्कृधि कृधि नो राजसु राजसु न स्कृधि ।

(4)[P27] 5.7.6.4(3)- राजसु ।

राजस्विति राज - सु ।

(5)[P27] 5.7.6.4(4)- नः । कृधि ॥

न स्कृधि कृधि नो न स्कृधि ।

(6)[P27] 5.7.6.4(5)- कृधि ॥

कृधीति कृधि ।

(7)[P27] 5.7.6.4(6)- रुचम् । विश्येषु । शूद्रेषु । (GS-5.7-25)

रुचं ँविश्येषु विश्येषु रुच(ग्म्) रुचं ँविश्येषु शूद्रेषु शूद्रेषु विश्येषु रुच(ग्म्) रुचं ँविश्येषु शूद्रेषु ।

(8)[P27] 5.7.6.4(7)- विश्येषु । शूद्रेषु । मयि । (GS-5.7-25)

विश्येषु शूद्रेषु शूद्रेषु विश्येषु विश्येषु शूद्रेषु मयि मयि शूद्रेषु विश्येषु विश्येषु शूद्रेषु मयि ।

(9)[P27] 5.7.6.4(8)- शूद्रेषु । मयि । धेहि । (GS-5.7-25)

शूद्रेषु मयि मयि शूद्रेषु शूद्रेषु मयि धेहि धेहि मयि शूद्रेषु शूद्रेषु मयि धेहि ।

(10)[P27] 5.7.6.4(9)– मयि । धेहि । रुचा । (GS–5.7–25)

मयि धेहि धेहि मयि मयि धेहि रुचा रुचा धेहि मयि मयि धेहि रुचा ।

(11)[P27] 5.7.6.4(10)– धेहि । रुचा । रुचम् ॥ (GS–5.7–25)

धेहि रुचा रुचा धेहि धेहि रुचा रुच(ग्म्) रुच(ग्म्) रुचा धेहि धेहि रुचा रुचम् ।

(12)[P27] 5.7.6.4(11)– रुचा । रुचम् ॥

रुचा रुच(ग्म्) रुच(ग्म्) रुचा रुचा रुचम् ।

(13)[P27] 5.7.6.4(12)– रुचम् ॥

रुचमिति रुचम् ।

(14)[P27] 5.7.6.4(13)– द्वेधा । वै । अग्निम् ।

द्वेधा वै वै द्वेधा द्वेधा वा अग्नि मग्निं ँवै द्वेधा द्वेधा वा अग्निम् ।

(15)[P27] 5.7.6.4(14)– वै । अग्निम् । चिक्यानस्य ।

वा अग्नि मग्निं ँवै वा अग्निम् चिक्यानस्य चिक्यानस्याग्निं ँवै वा अग्निम् चिक्यानस्य ।

(16)[P27] 5.7.6.4(15)– अग्निम् । चिक्यानस्य । यशः ।

अग्निम् चिक्यानस्य चिक्यानस्याग्नि मग्निम् चिक्यानस्य यशो यश श्चिक्यानस्याग्नि मग्निम् चिक्यानस्य यशः ।

(17)[P27] 5.7.6.4(16)– चिक्यानस्य । यशः । इन्द्रियम् ।

चिक्यानस्य यशो यश श्चिक्यानस्य चिक्यानस्य यश इन्द्रिय मिन्द्रियं ँयश श्चिक्यानस्य चिक्यानस्य यश इन्द्रियम् ।

(18)[P27] 5.7.6.4(17)– यशः । इन्द्रियम् । गच्छति ।

यश इन्द्रिय मिन्द्रियं ँयशो यश इन्द्रियम् गच्छति गच्छतीन्द्रियं ँयशो यश इन्द्रियम् गच्छति ।

(19)[P27] 5.7.6.4(18)– इन्द्रियम् । गच्छति । अग्निम् ।

इन्द्रियम् गच्छति गच्छतीन्द्रिय मिन्द्रियम् गच्छ त्यग्नि मग्निम् गच्छतीन्द्रिय मिन्द्रियम् गच्छ त्यग्निम् ।

(20)[P27] 5.7.6.4(19)– गच्छति । अग्निम् । वा ।

गच्छ त्यग्नि मग्निम् गच्छति गच्छ त्यग्निं वाँ वा ऽग्निम् गच्छति गच्छ त्यग्निं वाँ ।

(21)[P27] 5.7.6.4(20)– अग्निम् । वा । चितम् ।

अग्निं वाँ वा ऽग्नि मग्निं वाँ चितम् चितं वाँ ऽग्नि मग्निं वाँ चितम् ।

(22)[P27] 5.7.6.4(21)– वा । चितम् । ईजानम् ।

वा चितम् चितं वाँ वा चित मीजान मीजानम् चितं वाँ वा चित मीजानम् ।

(23)[P27] 5.7.6.4(22)– चितम् । ईजानम् । वा ।

चित मीजान मीजानम् चितम् चित मीजानं वाँ वेजानम् चितम् चित मीजानं वाँ ।

(24)[P27] 5.7.6.4(23)– ईजानम् । वा । यत् ।

ईजानं वाँ वेजान मीजानं वाँ यद् यद् वेजान मीजानं वाँ यत् ।

(25)[P27] 5.7.6.4(24)– वा । यत् । एताः ।

वा यद् यद् वा वा यदेता एता यद् वा वा यदेताः ।

(26)[P27] 5.7.6.4(25)– यत् । एताः । आहुतीः ।

यदेता एता यद् यदेता आहुती राहुती रेता यद् यदेता आहुतीः ।

(27)[P27] 5.7.6.4(26)– एताः । आहुतीः । जुहोति ।

एता आहुती राहुती रेता एता आहुतीर् जुहोति जुहो त्याहुती रेता एता आहुतीर् जुहोति ।

(28)[P27] 5.7.6.4(27)– आहुतीः । जुहोति । आत्मन्न् ।

आहुतीर् जुहोति जुहो त्याहुती राहुतीर् जुहो त्यात्मन् नात्मन् जुहो त्याहुती राहुतीर् जुहो त्यात्मन्न् ।

(29)[P27] 5.7.6.4(27)– आहुतीः ।

आहुतीरित्या – हुतीः ।

(30)[P27] 5.7.6.4(28)– जुहोति । आत्मन्न् । एव ।

जुहो त्यात्मन् नात्मन् जुहोति जुहो त्यात्मन् नेवै वात्मन् जुहोति जुहो त्यात्मन् नेव ।

(31)[P27] 5.7.6.4(29)– आत्मन्न् । एव । यशः ।

आत्मन् नेवै वात्मन् नात्मन् नेव यशो यश एवात्मन् नात्मन् नेव यशः ।

(32)[P27] 5.7.6.4(30)– एव । यशः । इन्द्रियम् ।

एव यशो यश एवैव यश इन्द्रिय मिन्द्रियं ँयश एवैव यश इन्द्रियम् ।

(33)[P27] 5.7.6.4(31)– यशः । इन्द्रियम् । धत्ते ।

यश इन्द्रिय मिन्द्रियं ँयशो यश इन्द्रियम् धत्ते धत्त इन्द्रियं ँयशो यश इन्द्रियम् धत्ते ।

(34)[P27] 5.7.6.4(32)– इन्द्रियम् । धत्ते । ईश्वरः ।

इन्द्रियम् धत्ते धत्त इन्द्रिय मिन्द्रियम् धत्त ईश्वर ईश्वरो धत्त इन्द्रिय मिन्द्रियम् धत्त ईश्वरः ।

(35)[P27] 5.7.6.4(33)– धत्ते । ईश्वरः । वै ।

धत्त ईश्वर ईश्वरो धत्ते धत्त ईश्वरो वै वा ईश्वरो धत्ते धत्त ईश्वरो वै ।

(36)[P27] 5.7.6.4(34)– ईश्वरः । वै । एषः ।

ईश्वरो वै वा ईश्वर ईश्वरो वा एष एष वा ईश्वर ईश्वरो वा एषः ।

(37)[P27] 5.7.6.4(35)– वै । एषः । आर्तिम् ।

वा एष एष वै वा एष आर्ति मार्ति मेष वै वा एष आर्तिम् ।

(38)[P27] 5.7.6.4(36)- एषः । आर्तिम् । आर्तोः ।

एष आर्ति मार्ति मेष एष आर्ति मार्तो रार्तो रार्ति मेष एष आर्ति मार्तोः ।

(39)[P27] 5.7.6.4(37)- आर्तिम् । आर्तोः । यः ।

आर्ति मार्तो रार्तो रार्ति मार्ति मार्तोर् यो य आर्तो रार्ति मार्ति मार्तोर् यः ।

(40)[P27] 5.7.6.4(38)- आर्तोः । यः । अग्निम् ।

आर्तोर् यो य आर्तो रार्तोर् यो ऽग्नि मग्निं ँय आर्तो रार्तोर् यो ऽग्निम् ।

(41)[P27] 5.7.6.4(38)- आर्तोः ।

आर्तोरित्या - अर्तोः ।

(42)[P27] 5.7.6.4(39)- यः । अग्निम् । चिन्वन्न् । (GS-5.7-23)

यो ऽग्नि मग्निं ँयो यो ऽग्निम् चिन्व(गग्) श्चिन्वन् नग्निं ँयो यो ऽग्निम् चिन्वन्न् ।

(43)[P27] 5.7.6.4(40)- अग्निम् । चिन्वन्न् । अधिक्रामति । (GS-5.7-23)

अग्निम् चिन्व(गग्) श्चिन्वन् नग्नि मग्निम् चिन्वन् नधिक्राम त्यधिक्रामति चिन्वन् नग्नि मग्निम् चिन्वन् नधिक्रामति ।

(44)[P27] 5.7.6.4(41)- चिन्वन्न् । अधिक्रामति । तत् । (GS-5.7-23)

चिन्वन् नधिक्राम त्यधिक्रामति चिन्व(गग्) श्चिन्वन् नधिक्रामति तत् तदधिक्रामति चिन्व(गग्) श्चिन्वन् नधिक्रामति तत् ।

(45)[P27] 5.7.6.4(42)- अधिक्रामति । तत् । त्वा । (GS-5.7-23)

अधिक्रामति तत् तदधिक्राम त्यधिक्रामति तत् त्वा त्वा तदधिक्राम त्यधिक्रामति तत् त्वा ।

(46)[P27] 5.7.6.4(42)- अधिक्रामति । (GS-5.7-23)

अधिक्रामतीत्यधि - क्रामति ।

(47)[P27] 5.7.6.4(43)- तत् । त्वा । यामि ।

तत् त्वा त्वा तत् तत् त्वा यामि यामि त्वा तत् तत् त्वा यामि ।

(48)[P27] 5.7.6.4(44)- त्वा । यामि । ब्रह्मणा ।

त्वा यामि यामि त्वा त्वा यामि ब्रह्मणा ब्रह्मणा यामि त्वा त्वा यामि ब्रह्मणा ।

(49)[P27] 5.7.6.4(45)- यामि । ब्रह्मणा । वन्दमानः ।

यामि ब्रह्मणा ब्रह्मणा यामि यामि ब्रह्मणा वन्दमानो वन्दमानो ब्रह्मणा यामि यामि ब्रह्मणा वन्दमानः ।

(50)[P27] 5.7.6.4(46)- ब्रह्मणा । वन्दमानः । इति ।

ब्रह्मणा वन्दमानो वन्दमानो ब्रह्मणा ब्रह्मणा वन्दमान इतीति वन्दमानो ब्रह्मणा ब्रह्मणा वन्दमान इति ।

(51)[P27] 5.7.6.4(47)- वन्दमानः । इति । वारुण्या ।

वन्दमान इतीति वन्दमानो वन्दमान इति वारुण्या वारुण्येति वन्दमानो वन्दमान इति वारुण्या ।

(52)[P27] 5.7.6.4(48)- इति । वारुण्या । ऋचा ।

इति वारुण्या वारुण्येतीति वारुण्य र्च र्चा वारुण्येतीति वारुण्य र्चा ।

(53)[P27] 5.7.6.4(49)- वारुण्या । ऋचा । जुहुयात् ।

वारुण्य र्च र्चा वारुण्या वारुण्य र्चा जुहुयाज् जुहुया दृचा वारुण्या वारुण्य र्चा जुहुयात् ।

(54)[P27] 5.7.6.4(50)- ऋचा । जुहुयात् । शान्तिः ।

ऋचा जुहुयाज् जुहुया दृच र्चा जुहुयाच् छान्तिः शान्तिर् जुहुया दृच र्चा जुहुयाच् छान्तिः ।

(1)[P28] 5.7.6.5(1)- जुहुयात् । शान्तिः । एव ।

जुहुयाच् छान्तिः शान्तिर् जुहुयाज् जुहुयाच् छान्ति रेवैव शान्तिर् जुहुयाज् जुहुयाच् छान्ति रेव ।

(2)[P28] 5.7.6.5(2)- शान्तिः । एव । एषा ।

शान्ति रेवैव शान्तिः शान्ति रेवै षैषैव शान्तिः शान्ति रेवैषा ।

(3)[P28] 5.7.6.5(3)- एव । एषा । अग्नेः ।

एवै षैषै वैवैषा ऽग्ने रग्ने रेषै वैवैषा ऽग्नेः ।

(4)[P28] 5.7.6.5(4)- एषा । अग्नेः । गुप्तिः ।

एषा ऽग्ने रग्ने रेषैषा ऽग्नेर् गुप्तिर् गुप्ति रग्ने रेषैषा ऽग्नेर् गुप्तिः ।

(5)[P28] 5.7.6.5(5)- अग्नेः । गुप्तिः । आत्मनः ।

अग्नेर् गुप्तिर् गुप्ति रग्ने रग्नेर् गुप्ति रात्मन आत्मनो गुप्ति रग्ने रग्नेर् गुप्ति रात्मनः ।

(6)[P28] 5.7.6.5(6)- गुप्तिः । आत्मनः । हविष्कृतः ।

गुप्ति रात्मन आत्मनो गुप्तिर् गुप्ति रात्मनो हविष्कृतो हविष्कृत आत्मनो गुप्तिर् गुप्ति रात्मनो हविष्कृतः ।

(7)[P28] 5.7.6.5(7)- आत्मनः । हविष्कृतः । वै ।

आत्मनो हविष्कृतो हविष्कृत आत्मन आत्मनो हविष्कृतो वै वै हविष्कृत आत्मन आत्मनो हविष्कृतो वै ।

(8)[P28] 5.7.6.5(8)- हविष्कृतः । वै । एषः ।

हविष्कृतो वै वै हविष्कृतो हविष्कृतो वा एष एष वै हविष्कृतो हविष्कृतो वा एषः ।

(9)[P28] 5.7.6.5(8)- हविष्कृतः ।

हविष्कृत इति हविः - कृतः ।

(10)[P28] 5.7.6.5(9)– वै । ए॒षः । यः ।

वा ए॒ष ए॒ष वै वा ए॒ष यो य ए॒ष वै वा ए॒ष यः ।

(11)[P28] 5.7.6.5(10)– ए॒षः । यः । अ॒ग्निम् ।

ए॒ष यो य ए॒ष ए॒ष यो᳚ ऽग्नि म॒ग्निं ँय ए॒ष ए॒ष यो᳚ ऽग्निम् ।

(12)[P28] 5.7.6.5(11)– यः । अ॒ग्निम् । चि॒नु॒ते ।

यो᳚ ऽग्नि म॒ग्निं ँयो यो᳚ ऽग्निम् चि॑नु॒ते चि॑नु॒ते᳚ ऽग्निं ँयो यो᳚ ऽग्निम् चि॑नु॒ते ।

(13)[P28] 5.7.6.5(12)– अ॒ग्निम् । चि॒नु॒ते । यथा᳚ ।

अ॒ग्निम् चि॑नु॒ते चि॑नु॒ते᳚ ऽग्नि म॒ग्निम् चि॑नु॒ते यथा॒ यथा॑ चिनु॒ते᳚ ऽग्नि म॒ग्निम् चि॑नु॒ते यथा᳚ ।

(14)[P28] 5.7.6.5(13)– चि॒नु॒ते । यथा᳚ । वै ।

चि॒नु॒ते यथा॒ यथा॑ चिनु॒ते चि॑नु॒ते यथा॒ वै वै यथा॑ चिनु॒ते चि॑नु॒ते यथा॒ वै ।

(15)[P28] 5.7.6.5(14)– यथा᳚ । वै । ह॒विः ।

यथा॒ वै वै यथा॒ यथा॒ वै ह॒विर्. ह॒विर् वै यथा॒ यथा॒ वै ह॒विः ।

(16)[P28] 5.7.6.5(15)– वै । ह॒विः । स्कन्द॑ति ।

वै ह॒विर्. ह॒विर् वै वै ह॒विः स्कन्द॑ति॒ स्कन्द॑ति ह॒विर् वै वै ह॒विः स्कन्द॑ति ।

(17)[P28] 5.7.6.5(16)– ह॒विः । स्कन्द॑ति । ए॒वम् ।

ह॒विः स्कन्द॑ति॒ स्कन्द॑ति ह॒विर्. ह॒विः स्कन्द॑ त्ये॒व मे॒व(ग्ग्) स्कन्द॑ति ह॒विर्. ह॒विः स्कन्द॑ त्ये॒वम् ।

(18)[P28] 5.7.6.5(17)– स्कन्द॑ति । ए॒वम् । वै ।

स्कन्द॑ त्ये॒व मे॒व(ग्ग्) स्कन्द॑ति॒ स्कन्द॑ त्ये॒वं ँवै वा ए॒व(ग्ग्) स्कन्द॑ति॒ स्कन्द॑ त्ये॒वं ँवै ।

(19)[P28] 5.7.6.5(18)– ए॒वम् । वै । ए॒षः ।

ए॒वं ँवै वा ए॒व मे॒वं ँवा ए॒ष ए॒ष वा ए॒व मे॒वं ँवा ए॒षः ।

(20)[P28] 5.7.6.5(19)- वै । एषः । स्कन्दति ।

वा एष एष वै वा एष स्कन्दति स्कन्द त्येष वै वा एष स्कन्दति ।

(21)[P28] 5.7.6.5(20)- एषः । स्कन्दति । यः ।

एष स्कन्दति स्कन्द त्येष एष स्कन्दति यो यः स्कन्द त्येष एष स्कन्दति यः ।

(22)[P28] 5.7.6.5(21)- स्कन्दति । यः । अग्निम् ।

स्कन्दति यो यः स्कन्दति स्कन्दति यो ऽग्नि मग्निं ँयः स्कन्दति स्कन्दति यो ऽग्निम् ।

(23)[P28] 5.7.6.5(22)- यः । अग्निम् । चित्वा ।

यो ऽग्नि मग्निं ँयो यो ऽग्निम् चित्वा चित्वा ऽग्निं ँयो यो ऽग्निम् चित्वा ।

(24)[P28] 5.7.6.5(23)- अग्निम् । चित्वा । स्त्रियम् ।

अग्निम् चित्वा चित्वा ऽग्नि मग्निम् चित्वा स्त्रिय(गग्) स्त्रियम् चित्वा ऽग्नि मग्निम् चित्वा स्त्रियम् ।

(25)[P28] 5.7.6.5(24)- चित्वा । स्त्रियम् । उपैति ।

चित्वा स्त्रिय(गग्) स्त्रियम् चित्वा चित्वा स्त्रिय मुपै त्युपैति स्त्रियम् चित्वा चित्वा स्त्रिय मुपैति ।

(26)[P28] 5.7.6.5(25)- स्त्रियम् । उपैति । मैत्रावरुण्या ।

स्त्रिय मुपै त्युपैति स्त्रिय(गग्) स्त्रिय मुपैति मैत्रावरुण्या मैत्रावरुण्योपैति स्त्रिय(गग्) स्त्रिय मुपैति मैत्रावरुण्या ।

(27)[P28] 5.7.6.5(26)- उपैति । मैत्रावरुण्या । आमिक्षया ।

